तथा।
“उपपातकलक्षाणि महापातककोटयः।
क्षणात् दहति देवेशि दीक्षा हि विधिना कृता॥”
यामले।
“आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः।
न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः॥”
अतः सद्गुरोराहितदीक्षः सर्व्वकर्म्माणि साधयेत्।*। तत्राप्यनुकूलमन्त्रं दीक्षेत। तथा च सारदायाम्।
“स्वताररांशिकोष्ठानामनुकूलान् भजेन्मनून्॥”
तथा वाराहीये।
“ताराचक्रं राशिचक्रं नामचक्रं तथैव च।
अत्र चेत् सगुणो मन्त्रो नान्यचक्रं विचारयेत्॥”
इति तु प्रधानतया बोद्धव्यम्। तथा च।
“धनिमन्त्रं न गृह्णीयात् अकुलञ्च तथैव च।”
इत्यादिदर्शनात् तत्तच्चक्रविचारस्य आवश्यकत्वात् प्रथमं तन्निरूप्यते।*। तत्र सिद्धसारस्वते।
“नृसिंहार्कवराहाणां प्रासादप्रणवस्य च।
सपिण्डाक्षरमन्त्राणां सिद्धादीन्नैव शोधयेत्॥
स्वप्नलब्धे स्त्रिया दत्ते मालामन्त्रे च त्र्यक्षरे।
वैदिकेषु च मन्त्रेषु सिद्धादीन्नैव शोधयेत्॥”*॥
मालामन्त्रस्तु वाराहीये।
“विंशत्यर्णाधिका मन्त्रा मालामन्त्राः प्रकीर्त्तिताः।
नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत्॥
हंसस्याष्टाक्षरस्यापि तथा पञ्चाक्षरस्य च।
एकद्वित्र्यादिबीजस्य सिद्धादीन्नैव शोधयेत्॥
तथा एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य पार्व्वति!।
वैदिकस्य च मन्त्रस्य सिद्धादीन्नैव शोधयेत्॥”*॥
तथा मुण्डमालातन्त्रे।
“काली तारा महाविद्या षोड़शी भुवनेश्वरी।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा॥
बगला सिद्धविद्या च मातङ्गी कमलात्मिका।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः॥”
मालिनीविजये।
“अथ वक्ष्याम्यहं या या महाविद्या महीतले।
दोषजालैरसंस्पृष्टास्ताः सर्व्वा हि फलैः सह॥
काली नीला महादुर्गा त्वरिता छिन्नमस्तका।
वाग्वादिनी चान्नपूर्णा तथा प्रत्यङ्गिरा पुनः॥
कामाख्यावासिनी बाला मातङ्गी शैलवासिनी।
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः॥
सिद्धमन्त्रतया नात्र युगसेवापरिश्रमः।
तथा चैता महाविद्याः कलिदोषान्न बाधिताः॥”
चामुण्डातन्त्रे।
“कलौ काली तथा तारा भैरवी छिन्नमस्तका।
त्रिकूटा त्रिपुटा दुर्गा तथा महिषमर्द्दिनी॥
कात्यायनी च चामुण्डा महाविद्याः प्रकीर्त्तिताः।
नात्र सिद्धाद्यपेक्षास्ति न नक्षत्रविचारणा॥
कालादिशोधनं नास्ति न चामित्रादिदूषणम्।
सिद्धविद्यातया नात्र युगसेवापरिश्रमः॥
नास्ति किञ्चिन्महादेवि! दुःखसाध्यं कथञ्चन॥”
इत्यादिवचनादेषु विचारो नास्ति। वस्तुतस्तु इदं प्रशंसापरम्। सर्व्वत्र विचारस्यावश्यकत्वम्। दुरदृष्टवशात् कदाचिद्वैरिमन्त्रस्य स्वप्नादौ प्राप्त्या तत्तद्दोषस्य दृष्टत्वात्।” इति तु साम्प्रदायिकाः।*। अत्र कुलाकुलचक्रम्। राशिचक्रम्। नक्षत्रचक्रम्। अकथहचक्रम्। अकडमचक्रम्। ऋणिधनिचक्रम्। एतानि चक्रशब्दे तत्तच्छब्दे च द्रष्टव्यानि।*।

अथ दीक्षाकालनियमः।

“मन्त्रारम्भस्तु चैत्रे स्यात् समस्तपुरुषार्थदः।
वैशाखे रत्नलाभः स्यात् ज्यैष्ठे तु मरणं भवेत्।
आषाढ़े बन्धुनाशः स्यात् पूर्णायुः श्रावणे भवेत्।
प्रजानाशो भवेद्भाद्रे आश्विने रत्नसञ्चयः॥
कार्त्तिके मन्त्रसिद्धिः स्यात् मार्गशीर्षे तु तद्भवेत्।
पौषे तु शत्रुपीड़ा स्यात् माघे मेधाविवर्द्धनम्॥
फाल्गुने सर्व्वकामाः स्युर्म्मलमासं विवर्ज्जयेत्॥”
चैत्र इति गोपालविषयम्। गौतम्युक्तत्वात्। मधुमासे भवेद्दीक्षा दुःखाय मरणाय चेति-वचनादन्यत्र। तथा,—
“ज्यैष्ठे मृत्युप्रदा विद्या आषाढ़े सुखसम्पदः।”
इति योगिनीहृदयादाषाढ़े श्रीविद्यायां न दोषः। अत्र च मासः सौर एव। सौरे मासि शुभा दीक्षा न चान्द्रे न च तारके। इति गौतमीयात् ५ अध्यायात्॥
वैशम्पायनसंहितायाम्।
“मन्त्रस्यारम्भणं मेषे धनधान्यप्रदं भवेत्।
वृषे मरणमाप्नोति मिथुनेऽपत्यनाशनम्॥
कर्कटे सर्व्वसिद्धिः स्यात् सिंहे मेधाविनाशनम्।
कन्यालक्ष्मीप्रदा नित्यं तुलायां सर्व्वसिद्धयः॥
वृश्चिके स्वर्णलाभः स्यात् धनुर्मानविनाशनम्।
मकरः पुण्यदः प्रोक्तः कुम्भो धनधान्यवृद्धिदः॥
मीनो दुःखप्रदो नित्यं एवं मासविधिक्रमः॥”
प्रतिप्रसवमाह। रुद्रयामले।
“कार्त्तिकाश्विनवैशाखमाघेऽथ मार्गशीर्षके।
फाल्गुने श्रावणे दीक्षा पुरश्चर्या प्रशस्यते॥”

अथ वारनियमः।

“रविवारे भवेद्वित्तं सोमे शान्तिर्भवेत् किल।
आयुरङ्गारके हन्ति तत्र दीक्षां विवर्ज्जयेत्॥
बुधे सौन्दर्य्यमाप्नोति ज्ञानं स्यात्तु बृहस्पतौ।
शुक्रे सौभाग्यमाप्नोति यशोहानिः शनैश्चरे॥”

अथ तिथिनिर्णयः।

आगमकल्पद्रुमे।
“प्रतिपदि कृता दीक्षा ज्ञाननाशकरी मता।
द्वितीयायां भवेज्ज्ञानं तृतीयायां शुचिर्भवेत्॥
चतुर्थ्यां वित्तनाशः स्यात् पञ्चम्यां बुद्धिवर्द्धनम्॥
षष्ठ्यां ज्ञानक्षयं सौख्यं लभते सप्तमीदिने॥
अष्टम्यां बुद्धिनाशः स्यात् नवम्यां वपुषः क्षयः।
दशम्यां राजसौभाग्यमेकादश्यां शुचिर्भवेत्॥
द्वादश्यां सर्व्वसिद्धिः स्यात् त्रयोदश्यां दरिद्रता।
तिर्य्यग्योनिश्चतुर्द्दश्यां दर्शनिर्मासावसानके॥
पक्षान्ते धर्म्मवृद्धिः स्यात् अस्वाध्यायं विवर्ज्जयेत्।
सन्ध्यागर्ज्जितनिर्घोषभूकम्पोल्कानिपातने॥
एतानन्यांश्च दिवसान् श्रुत्युक्तान् परिवर्ज्जयेत्।
द्वितीया पञ्चमी चैव षष्ठी चैव विशेषतः॥
द्वादश्यामपि कर्त्तव्यं त्रयोदश्यामथापि वा॥”
इति यत् त्रयोदशी विधानं तद्विष्णुविषयं रामार्च्चनचन्द्रिकाधृतत्वात्।
“पञ्चमी सप्तमी षष्ठी द्वितीया पूर्णिमा सिता।
त्रयोदशी तु दशमी प्रशस्ता सर्व्वकामदा॥”
इति सनत्कुमारवचनाच्च॥*॥
शिवविषये सप्तम्योर्निषेधमाह।
“शुक्लपक्षस्य दशमी सप्तमी च विशेषतः।
निन्द्या सदैव षष्ठी स्यादिति शैवागमान्तरे॥”

अथ नक्षत्रनिर्णयः।

“अश्विन्यां सुखमाप्नोति भरण्यां मरणं ध्रुवम्।
कृत्तिकायां भवेद्दुःखी रोहिण्यां वाक्पतिर्भवेत्॥
मृगशीर्षे सुखावाप्तिरार्द्रायां बन्धुनाशनम्।
पुनर्व्वसौ धनाढ्यः स्यात् पुष्ये शत्रुविनाशनम्॥
अश्लेषायां भवेन्मृत्युर्म्मघायां दुःखमोचनम्।
सौन्दर्य्यं पूर्व्वफल्गुन्यां प्राप्नोति च न संशयः॥
ज्ञानञ्चोत्तरफल्गुन्यां हस्तायाञ्च धनी भवेत्।
चित्रायां ज्ञानसिद्धिः स्यात् स्वात्यां शत्रुविनाशनम्॥
विशाखायां सुखञ्चानुराधायां बन्धुवर्द्धनम्।
ज्येष्ठायां सुतहानिः स्यात् मूलायां कीर्त्तिवर्द्धनम्॥
पूर्व्वाषाढ़ोत्तराषाढ़े भवेतां कीर्त्तिदायिके।
श्रवणायां भवेद्दुःखी धनिष्ठायां दरिद्रता॥
बुद्धिः शतभिषायां स्यात् पूर्व्वभाद्रे सुखी भवेत्।
सौख्यं चोत्तरभाद्रे च रेवत्यां कीर्त्तिवर्द्धनम्॥”
आर्द्राकृत्तिकयोर्निषेधस्तु शिववह्नीतरविषये। तथा च।
“आर्द्रायां कृत्तिकायाञ्च मन्त्रारम्भः प्रशस्यते
यदीशस्य कृशानोर्वा मन्त्रारम्भो यथाक्रमम्॥”
तन्त्रान्तरे।
“अश्विनीभरणीस्वातीविशाखाहस्तभेषु च।
ज्येष्ठोत्तरात्रयेष्वेवं कुर्य्यान्मन्त्राभिषेचनम्॥”
इति ज्येष्ठाभरण्योर्यद्विधानं तद्रामविषयं अगस्त्यसंहितोक्तत्वात्॥*॥

अथ योगादिनिर्णयो विम्बसारे।

“शुभः सिद्धस्तथायुष्मान् ध्रुवयोगस्ततः परम्।
प्रीतिः सौभाग्ययोगश्च वृद्धियोगस्ततः परम्॥
हर्षणश्च तथा योगः सर्व्वमन्त्रशुभावहः॥”
रत्नावल्याम्।
“योगाश्च प्रीतिरायुष्मान् सौभाग्यः शोभनो धृतिः।
वृद्धिर्ध्रुवः सुकर्म्मा च साध्यः शुक्लश्च हर्षणः॥
वरीयांश्च शिवः सिद्धो ब्रह्म इन्द्रश्च षोड़श॥”

अथ करणनिर्णयः।

“बववालवकौलवतैतिलगरवणिजस्तदनन्तरम्।
करणानि शुभान्येव सर्व्वतन्त्रेषु भाविनि!॥”

अथ लग्ननिर्णयः।

“वृषे सिंहे च कन्यायां धनुर्मीनाख्यलग्नके।
चन्द्रताराद्यनुकूले च कुर्य्याद्दीक्षाप्रवर्त्तनम्॥”